श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## ભીષ્મ સ્તુતિ



निज मति से अति रति कृष्ण स्तुति
सुंदर गति पाकर, भीष्म इति

### પ્રાર્થના

નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.
દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.

નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.
પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.

## શ્રી ગણેશાય નમઃ

શ્રીમદ્ભાગવતમહાપુરાણમ્ પ્રથમઃ સ્કંધઃ
.. અથ નવમોऽધ્યાયઃ ..

સૂત ઉવાચ
ઇતિ ભીતઃ(ફ્) પ્રજાદ્રોહાત્, સર્વધર્મવિવિત્સયા .
તતો વિનશનં(મ્) પ્રાગાદ્, યત્ર દેવવ્રતોऽપતત્ .. ૧..
સર્વ + ધર્મ + વિવિત્સયા, દેવ + વ્રતોऽ + પતત્
તદા તે ભ્રાતરઃ(સ્) સર્વે, સદશ્વૈઃ(સ્) સ્વર્ણભૂષિતૈઃ .
અન્વગચ્છન્ રથૈર્વિપ્રા, વ્યાસધૌમ્યાદયસ્તથા .. ૨..
વ્યાસ + ધૌમ્યા + દયસ્તથા

ભગવાનપિ વિપ્રર્ષે, રથેન સધનઞ્જયઃ .

સ તૈર્વ્યરોચત નૃપઃ(ખ્), કુબેર ઇવ ગુહ્યકૈઃ .. ૩ ..

તૈર્ + વ્યરોચત

દૃષ્ટ્વા નિપતિતં(મ્) ભૂમૌ, દિવશ્ચ્યુતમિવામરમ્ .

પ્રણેમુઃ(ફ્) પાણ્ડવા ભીષ્મં(મ્), સાનુગાઃ(સ્) સહ ચક્રિણા .. ૪..

દિવશ્ + ચ્યુત + મિવામરમ્

તત્ર બ્રહ્મર્ષયઃ(સ્) સર્વે, દેવર્ષયશ્ચ સત્તમ .

રાજર્ષયશ્ચ તત્રાસન્, દ્રષ્ટું(મ્) ભરતપુઙ્ગવમ્ .. ૫..

ભરત + પુઙ્ગવમ્

પર્વતો નારદો ધૌમ્યો, ભગવાન્ બાદરાયણઃ .

બૃહદશ્વો ભરદ્વાજઃ(સ્), સશિષ્યો રેણુકાસુતઃ .. ૬..

બૃહ + દશ્વો

વસિષ્ઠ ઇન્દ્રપ્રમદસ્, ત્રિતો ગૃત્સમદોઽસિતઃ .

કક્ષીવાન્ ગૌતમોઽત્રિશ્ચ, કૌશિકોઽથ સુદર્શનઃ .. ૭..

ગૃત્ + સમદોઽ + સિતઃ

અન્યે ચ મુનયો બ્રહ્મન્, બ્રહ્મરાતાદયોઽમલાઃ .

શિષ્યૈરુપેતા આજગ્મુઃ(ખ્), કશ્યપાઙ્ગિરસાદયઃ .. ૮..

બ્રહ્મ + રાતા + દયોઽ + મલા ,કશ્ય + પાઙ્ગિ + રસાદયઃ

તાન્ સમેતાન્ મહાભાગા- નુપલભ્ય વસૂત્તમઃ .

પૂજયામાસ ધર્મજ્ઞો, દેશકાલવિભાગવિત્ .. ૯..

દેશ + કાલ + વિભાગ + વિત્

કૃષ્ણં(ઞ્) ચ તત્પ્રભાવજ્ઞ, આસીનં(ઞ્) જગદીશ્વરમ્ .

હૃદિસ્થં(મ્) પૂજયામાસ, માયયોપાત્તવિગ્રહમ્ .. ૧૦..

માયયો + પાત્ + તવિગ્રહમ્

પાણ્ડુપુત્રાનુપાસીનાન્, પ્રશ્રયપ્રેમસઙ્ગતાન્ .
અભ્યાચષ્ટાનુરાગાસ્રૈ- રન્ધીભૂતેન ચક્ષુષા .. ૧૧..

પાણ્ડુ + પુત્રા + નુપા + સીનાન્ ,પ્રશ્રય + પ્રેમ + સઙ્ગતાન્, અભ્યા + ચષ્ટા + નુરાગા + સ્રૈ

અહો કષ્ટમહોઽન્યાય્યં(મ્), યદ્યૂયં(ન્) ધર્મનન્દનાઃ .
જીવિતું(ન્) નાર્હથ ક્લિષ્ટં(મ્), વિપ્રધર્માચ્યુતાશ્રયાઃ .. ૧૨..

વિપ્રધર્મા + ચ્યુતા + શ્રયાઃ

સં(વ્)સ્થિતેઽતિરથે પાણ્ડૌ, પૃથા બાલપ્રજા વધૂઃ .
યુષ્મત્કૃતે બહૂન્ ક્લેશાન્, પ્રાપ્તા તોકવતી મુહુઃ .. ૧૩..

સં(વ્)સ્થિતેઽ + તિરથે, યુષ્મત્ + કૃતે

સર્વં(ઙ્) કાલકૃતં(મ્) મન્યે, ભવતાં(ઞ્) ચ યદપ્રિયમ્ .
સપાલો યદ્વશે લોકો, વાયોરિવ ઘનાવલિઃ .. ૧૪..

યત્ર ધર્મસુતો રાજા, ગદાપાણિર્વૃકોદરઃ .
કૃષ્ણોઽસ્ત્રી ગાણ્ડિવં(ઞ્) ચાપં(મ્), સુહૃત્કૃષ્ણસ્તતો વિપત્ .. ૧૫..

ગદા + પાણિર્ + વૃકોદરઃ, સુહૃત્ + કૃષ્ણસ્ + તતો

ન હ્યસ્ય કર્હિચિદ્રાજન્, પુમાન્ વેદ વિધિત્સિતમ્ .
યદ્વિજિજ્ઞાસયા યુક્તા, મુહ્યન્તિ કવયોઽપિ હિ .. ૧૬..

યદ્ + વિજિજ્ઞાસયા

તસ્માદિદં(ન્) દૈવતન્ત્રં(મ્), વ્યવસ્ય ભરતર્ષભ .
તસ્યાનુવિહિતોઽનાથા, નાથ પાહિ પ્રજાઃ(ફ્) પ્રભો .. ૧૭..

તસ્યા + નુવિહિતોઽ + નાથા

એષ વૈ ભગવાન્ સાક્ષા-દાદ્યો નારાયણઃ(ફ્) પુમાન્ .
મોહયન્માયયા લોકં(ઙ્), ગૂઢશ્ચરતિ વૃષ્ણિષુ .. ૧૮..

મોહયન્ + માયયા , ગૂઢશ્ + ચરતિ

અસ્યાનુભાવં(મ્) ભગવાન્, વેદ ગુહ્યતમં(મ્) શિવઃ .
દેવર્ષિર્નારદઃ(સ્) સાક્ષાદ્- ભગવાન્ કપિલો નૃપ .. ૧૯..

અસ્યા + નુભાવં(મ્) , દેવર્ષિર્ + નારદઃ(સ્)

યં(મ્) મન્યસે માતુલેયં(મ્),પ્રિયં(મ્) મિત્રં(મ્) સુહૃત્તમમ્

અકરોઃ(સ્) સચિવં(ન્) દૂતં(મ્), સૌહૃદાદથ સારથિમ્ .. ૨૦..

સુહૃત્ + તમમ્ , સૌહૃદા + દથ

સર્વાત્મનઃ(સ્) સમદૃશો હ્યદ્વયસ્યાનહઙ્કૃતેઃ .

તત્કૃતં(મ્) મતિવૈષમ્યં(ન્), નિરવદ્યસ્ય ન ક્વચિત્ .. ૨૧..

હ્યદ્ + વયસ્યા + નહઙ્કૃતેઃ

તથાપ્યેકાન્તભક્તેષુ, પશ્ય, ભૂપાનુકમ્પિતમ્ .

યન્મેઽસૂં(વ્) સ્ત્યજતઃ(સ્) સાક્ષાત્, કૃષ્ણો દર્શનમાગતઃ .. ૨૨..

તથાપ્યે + કાન્ત + ભક્તેષુ , ભૂપાનુ + કમ્પિતમ્

યન્મેઽ + સૂં(વ્)સ્ + ત્યજતઃ(સ્)

ભક્ત્યાઽઽવેશ્ય મનો યસ્મિન્, વાચા યન્નામ કીર્તયન્ .

ત્યજન્ કલેવરં(મ્) યોગી, મુચ્યતે કામકર્મભિઃ .. ૨૩..

ભક્ત્યા + વેશ્ય

સ દેવદેવો ભગવાન્ પ્રતીક્ષતાં(ઙ્),

કલેવરં(મ્) યાવદિદં(મ્) હિનોમ્યહમ્ .

પ્રસન્નહાસારુણલોચનોલ્લસન્,

મુખામ્બુજો ધ્યાનપથશ્ચતુર્ભુજઃ .. ૨૪..

પ્રસન્ન + હાસા + રુણ + લોચનોલ્લસન્ ,ધ્યાન + પથશ્ + ચતુર્ભુજઃ

સૂત ઉવાચ

યુધિષ્ઠિરસ્તદાકર્ણ્ય, શયાનં (મ્) શરપઞ્જરે .

અપૃચ્છદ્વિવિધાન્ધર્મા- નૃષીણાં(ઞ્) ચાનુશૃણ્વતામ્ .. ૨૫..

યુધિષ્ઠિરસ્ + તદા + કર્ણ્ય ,અપૃચ્છદ્ + વિવિધાન્ + ધર્મા , ચાનુ + શૃણ્વતામ્

પુરુષસ્વભાવવિહિતાન્, યથાવર્ણં(મ્) યથાશ્રમમ્ .

વૈરાગ્યરાગોપાધિભ્યા- મામ્નાતોભયલક્ષણાન્ .. ૨૬..

પુરુષ + સ્વભાવ + વિહિતાન્ વૈરાગ્ય + રાગો + પાધિભ્યા ,મામ્નાતો + ભય + લક્ષણાન્

દાનધર્માન્ રાજધર્માન્, મોક્ષધર્માન્ વિભાગશઃ .
સ્ત્રીધર્માન્ ભગવદ્ધર્માન્, સમાસવ્યાસયોગતઃ .. ૨૭..

ભગવદ્ + ધર્માન્, સમા + સવ્યાસ + યોગતઃ

ધર્માર્થકામમોક્ષાં(વ્)શ્ચ, સહોપાયાન્ યથા મુને .
નાનાખ્યાનેતિહાસેષુ, વર્ણયામાસ તત્ત્વવિત્ .. ૨૮..

ધર્માર્થ + કામ + મોક્ષાં(વ્)શ્ચ. નાનાખ્યા + નેતિ + હાસેષુ

ધર્મં(મ્) પ્રવદતસ્તસ્ય, સ કાલઃ(ફ્) પ્રત્યુપસ્થિતઃ
યો યોગિનશ્છન્દમૃત્યોર્, વાઞ્છિતસ્તૂત્તરાયણઃ .. ૨૯..

પ્રવદ + તસ્તસ્ય યોગિનશ્ + છન્દ + મૃત્યોર્ વાઞ્છિતસ્ + તૂત્ + તરાયણઃ

તદોપસં(વ્) હૃત્ય ગિરઃ(સ્) સહસ્રણીર્
વિમુક્તસઙ્ગં(મ્) મન આદિપૂરુષે .
કૃષ્ણે લસત્પીતપટે ચતુર્ભુજે,
પુરઃ(સ્) સ્થિતેઽમીલિતદૃગ્વ્યધારયત્ .. ૩૦..

પુરઃ + સ્થિતેઽ + મીલિ + તદૃગ્ + વ્યધારયત્

વિશુદ્ધયા ધારણયા હતાશુભસ્-
તદીક્ષયૈવાશુ ગતાયુધવ્યથઃ
નિવૃત્તસર્વેન્દ્રિયવૃત્તિવિભ્રમસ્-
તુષ્ટાવ જન્યં(મ્) વિસૃજઞ્જનાર્દનમ્ .. ૩૧..

તદી + ક્ષયૈ + વાશુ ,ગતા + યુધ + વ્યથઃ
નિવૃત્ + તસર્વેન્દ્રિય + વૃત્તિ + વિભ્રમસ્ , વિસૃજગ્ + જનાર્દનમ્

શ્રીભીષ્મ ઉવાચ

ઇતિ મતિરુપકલ્પિતા વિતૃષ્ણા
ભગવતિ સાત્વતપુઙ્ગવે વિભૂમ્નિ .
સ્વસુખમુપગતે ક્વચિદ્વિહર્તું(મ્)
પ્રકૃતિમુપેયુષિ યદ્ભવપ્રવાહઃ .. ૩૨..

મતિ + રુપ + કલ્પિતા,સાત્ + વત + પુઙ્ગવે ,સ્વ + સુખ + મુપગતે, ક્વચિદ્ + વિહર્તું(મ્)

પ્રકૃતિ + મુપે + યુષિ, યદ્ + ભવ + પ્રવાહઃ

ત્રિભુવનકમનં(ન્) તમાલવર્ણં(મ્),
રવિકરગૌરવરામ્બરં(ન્) દધાને .
વપુરલકકુલાવૃતાનનાબ્જં(મ્),
વિજયસખે રતિરસ્તુ મેઽનવદ્યા .. ૩૩..

ત્રિભુવન + કમનં(ન્), રવિકર + ગૌરવ + રામ્બરં(ન્)

વપુ + રલક + કુલા + વૃતા + નનાબ્જં(મ્)

યુધિ તુરગરજોવિધૂમ્રવિષ્વક્-
કચલુલિતશ્રમવાર્યલઙ્કૃતાસ્યે .
મમ નિશિતશરૈર્વિભિદ્યમાન-
ત્વચિ વિલસત્કવચેઽસ્તુ કૃષ્ણ આત્મા .. ૩૪..

તુરગ + રજો + વિધૂમ્ર + વિષ્વક્, કચ + લુલિત + શ્રમ + વાર્યલઙ્ + કૃતાસ્યે

નિશિત + શરૈર્ + વિભિદ્યમાન વિલસત્ + કવચેઽસ્તુ

સપદિ સખિવચો નિશમ્ય મધ્યે,
નિજપરયોર્બલયો રથં(ન્) નિવેશ્ય .
સ્થિતવતિ પરસૈનિકાયુરક્ષ્ણા
હૃતવતિ પાર્થસખે રતિર્મમાસ્તુ .. ૩૫..

નિજ + પરયોર્ + બલયો ,પર + સૈનિકા + યુરક્ષ્ણા, રતિર્ + મમાસ્તુ

વ્યવહિતપૃતનામુખં(ન્) નિરીક્ષ્ય,
સ્વજનવધાદ્વિમુખસ્ય દોષબુદ્ધ્યા .
કુમતિમહરદાત્મવિદ્યયા યશ્-
ચરણરતિઃ(ફ્) પરમસ્ય તસ્ય મેઽસ્તુ .. ૩૬..

વ્યવહિત + પૃતના + મુખં(ન્), સ્વજન + વધાદ્ + વિમુખસ્ય ,

કુમતિ + મહર + દાત્મ + વિદ્યયા

સ્વનિગમમપહાય મત્પ્રતિજ્ઞા-

મૃતમધિકર્તુમવપ્લુતો રથસ્થઃ .

ધૃતરથચરણોऽભ્યયાચ્ચલદ્ ગુર્-

હરિરિવ હન્તુમિભં(ઙ્) ગતોત્તરીયઃ .. ૩૭..

સ્વ + નિગમ + મપહાય , મૃત + મધિકર્ + તુમ + વપ્લુતો

ધૃત + રથ + ચરણોऽભ્ય + યાચ્+ ચલદ્ગુર, ગતોત્ + તરીય

શિતવિશિખહતો વિશીર્ણદં(વ્) શઃ(હ)

ક્ષતજપરિપ્લુત આતતાયિનો મે .

પ્રસભમભિસસાર મદ્વધાર્થં(મ્)

સ ભવતુ મે ભગવાન્ ગતિર્મુકુન્દઃ .. ૩૮..

શિત + વિશિખ + હતો ,ક્ષતજ + પરિપ્લુત , પ્રસભમ + ભિસસાર

વિજયરથકુટુમ્બ આત્તતોત્રે,

ધૃતહયરશ્મિનિ તચ્છ્રિયેક્ષણીયે .

ભગવતિ રતિરસ્તુ મે મુમૂર્ષોર્,

યમિહ નિરીક્ષ્ય હતા ગતાઃ(સ્) સરૂપમ્ .. ૩૯..

આત્ + તતોત્રે, ધૃત + હય + રશ્મિનિ ,તચ્છ્રિયે + ક્ષણીયે, મૂમુર્ + ષોર્

લલિતગતિવિલાસવલ્ગુહાસ-

પ્રણયનિરીક્ષણકલ્પિતોરુમાનાઃ

કૃતમનુકૃતવત્ય ઉન્મદાન્ધાઃ(ફ઼્)

પ્રકૃતિમગન્ કિલ યસ્ય ગોપવધ્વઃ .. ૪૦..

લલિત + ગતિ + વિલાસ + વલ્ગુહાસ, પ્રણય + નિરિક્ષણ + કલ્પિતો + રુમાનાઃ

મુનિગણનૃપવર્યસઙ્કુલેऽન્તઃ(સ્)

સદસિ યુધિષ્ઠિરરાજસૂય એષામ્ .

અર્હણમુપપેદ ઈક્ષણીયો,

મમ દૃશિગોચર એષ આવિરાત્મા .. ૪૧..

મુનિગણ + નૃપવર્ય + સઙ્કુલેઽન્તઃ(સ્)
યુધિષ્ઠિર + રાજસૂય, અર્હણ + મુપપેદ

તમિમમહમજં(મ્) શરીરભાજાં(મ્)
હૃદિ હૃદિ ધિષ્ઠિતમાત્મકલ્પિતાનામ્ .
પ્રતિદૃશમિવ નૈકધાર્કમેકં(મ્),
સમધિગતોઽસ્મિ વિધૂતભેદમોહઃ .. ૪૨..

ધિષ્ઠિત + માત્મ + કલ્પિતાનામ્
પ્રતિ + દૃશ + મિવ, નૈક + ધાર્ક + મેકં(મ્)
સમધિ + ગતોઽસ્મિ ,વિધૂત + ભેદમોહઃ

સૂત ઉવાચ
કૃષ્ણ એવં(મ્) ભગવતિ, મનોવાગ્દૃષ્ટિવૃત્તિભિઃ .
આત્મન્યાત્માનમાવેશ્ય, સોઽન્તઃ(શ્)શ્વાસ ઉપારમત્ .. ૪૩..

મનોવાગ્ + દૃષ્ટિ + વૃત્તિભિઃ ,આત્મન્યાત્ + માન + માવેશ્ય

સમ્પદ્યમાનમાજ્ઞાય, ભીષ્મં(મ્) બ્રહ્મણિ નિષ્કલે .
સર્વે બભૂવુસ્તે તૂષ્ણીં(મ્) વયાં(વ્)સીવ દિનાત્યયે .. ૪૪..

સમ્પદ્ય + માન + માજ્ઞાય ,બભૂ + વુસ્તે

તત્ર દુન્દુભયો નેદુર્, દેવમાનવવાદિતાઃ .
શશં(વ્)સુઃ(સ્) સાધવો રાજ્ઞાં(ઙ્), ખાત્પેતુઃ(ફ્) પુષ્પવૃષ્ટયઃ .. ૪૫..

દેવ + માનવ + વાદિતાઃ,પુષ્પ + વૃષ્ટયઃ

તસ્ય નિર્હરણાદીનિ, સમ્પરેતસ્ય ભાર્ગવ .
યુધિષ્ઠિરઃ(ખ્) કારયિત્વા, મુહૂર્તં(ન્) દુઃખિતોઽભવત્ .. ૪૬..

નિર્ + હરણા + દીનિ, સમ્ + પરેતસ્ય

તુષ્ટુવુર્મુનયો હૃષ્ટાઃ(ખ્), કૃષ્ણં(ન્) તદ્ગુહ્યનામભિઃ .
તતસ્તે કૃષ્ણહૃદયાઃ(સ્), સ્વાશ્રમાન્ પ્રયયુઃ(ફ્) પુનઃ .. ૪૭..

તુષ્ટુવુર્ + મુનયો, તદ્ + ગુહ્ય + નામભિઃ

તતો યુધિષ્ઠિરો ગત્વા, સહકૃષ્ણો ગજાહ્વયમ્ .
પિતરં(મ્) સાન્ત્વયામાસ, ગાન્ધારીં(ઞ્) ચ તપસ્વિનીમ્ .. ૪૮..

સાન્ત્વ + યામાસ

પિત્રા ચાનુમતો રાજા, વાસુદેવાનુમોદિતઃ .
ચકાર રાજ્યં(ન્) ધર્મેણ, પિતૃપૈતામહં(મ્) વિભુઃ .. ૪૯..

વાસુદેવા + નુમોદિતઃ, પિતૃ + પૈતામહં(મ્)

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
પ્રથમસ્કંધે યુધિષ્ઠિરરાજ્યપ્રલમ્ભો નામ નવમોઽધ્યાયઃ .. ૯..
|| ૐ શ્રી કૃષ્ણાર્પણમસ્તુ ||

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ

